द्वादशः पाठः

कल्पलतेव विद्या

न चौरहार्यं न च राजहार्यं
न भ्रातृभाज्यं न च भारकारि ।
व्यये कृते वर्धत एव नित्यं
विद्याधनं सर्वधनप्रधानम् ॥ 1 ॥

विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनम्
विद्या भोगकरी यशः सुखकरी विद्या गुरूणां गुरुः ।
विद्या बन्धुजनो विदेशगमने विद्या परा देवता
विद्या राजसु पूज्यते न हि धनं विद्या-विहीनः पशुः ॥ 2 ॥

केयूराः न विभूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वला
न स्नानं न विलेपनं न कुसुमं नालङ्कृता मूर्धजाः ।
वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते
क्षीयन्तेऽखिलभूषणानि सततं वाग्भूषणं भूषणम् ॥ 3 ॥

मातेव रक्षति पितेव हिते नियुङ्क्ते
कान्तेव चाभिरमयत्यपनीयखेदम् ।
लक्ष्मीं तनोति वितनोति च दिक्षु कीर्तिम्
किं किं न साधयति कल्पलतेव विद्या ॥ 4 ॥

शब्दार्थाः

चौरहार्यम्	–	चोरों के द्वारा चुराने योग्य
राजहार्यम्	–	राजा के द्वारा छीनने योग्य
भ्रातृभाज्यम्	–	भाइयों के द्वारा बाँटने योग्य
भारकारि	–	भार बढ़ाने वाली
प्रच्छन्नगुप्तम्	–	निजी (आत्मीय) गुप्त
भोगकरी	–	भोग का साधन उपलब्ध कराने वाली
परा	–	सबसे बड़ी
राजसु	–	राजाओं में
केयूराः	–	बाजूबन्द
चन्द्रोज्ज्वला (चन्द्र + उज्ज्वला)	–	चन्द्रमा के समान चमकदार
विलेपनम्	–	शरीर पर लेप करने योग्य सुगन्धित-द्रव्य (चन्दन, केसर आदि)
नालङ्कृता (न + अलङ्कृता)	–	नहीं सजाया हुआ
मूर्धजाः	–	वेणी, चोटी
वाण्येका (वाणी + एका)	–	एकमात्र वाणी
समलङ्करोति	–	अच्छी तरह सुशोभित करती है
संस्कृता	–	संस्कारयुक्त (परिष्कृत)
धार्यते	–	धारण की जाती है
क्षीयन्तेऽखिलभूषणानि (क्षीयन्ते + अखिलभूषणानि)	–	सम्पूर्ण आभूषण नष्ट हो जाते हैं
हिते	–	कल्याण में
नियुङ्क्ते	–	लगाता/लगाती है
कान्तेव (कान्ता + इव)	–	पत्नी के समान

चाभिरमयत्यपनीयखेदम् (च + अभिरमयति + अपनीयखेदम्) – कष्ट को दूरकर आनन्दित करती है

तनोति – फैलाती है (वृद्धि करती है)

दिक्षु – दिशाओं में

साधयति – सफल बनाती है, सिद्ध करती है

कल्पलतेव (कल्पलता + इव) – कल्पलता की तरह

अभ्यासः



1. उपयुक्तकथनानां समक्षम् 'आम्', अनुपयुक्तकथनानां समक्षं 'न' इति लिखत–

(क) विद्या राजसु पूज्यते। ☐

(ख) वाग्भूषणं भूषणं न। ☐

(ग) विद्याधनं सर्वधनेषु प्रधानम्। ☐

(घ) विदेशगमने विद्या बन्धुजनः न भवति। ☐

(ङ) विद्या सर्वत्र कीर्तिं तनोति। ☐

2. अधोलिखितानां पदानां लिङ्गं, विभक्तिं वचनञ्च लिखत–

पदानि	लिङ्गम्	विभक्तिः	वचनम्
नरस्य	....	....	....
गुरूणाम्	....	....	....
केयूराः	....	....	....
कीर्तिम्	....	....	....
भूषणानि	....	....	....

3. श्लोकांशान् योजयत–

क	ख
विद्या राजसु पूज्यते न हि धनम्	हारा न चन्द्रोज्ज्वलाः
केयूराः न विभूषयन्ति पुरुषम्	न भ्रातृभाज्यं न च भारकारि
न चौरहार्यं न च राजहार्यम्	या संस्कृता धार्यते
मातेव रक्षति पितेव हिते नियुङ्क्ते	विद्या-विहीनः पशुः
वाण्येका समलङ्करोति पुरुषम्	कान्तेव चाभिरमयत्यपनीयखेदम्

4. एकपदेन प्रश्नानाम् उत्तराणि लिखत–

(क) कः पशुः?

(ख) का भोगकरी?

(ग) के पुरुषं न विभूषयन्ति?

(घ) का एका पुरुषं समलङ्करोति?

(ङ) कानि क्षीयन्ते?

5. रेखाङ्कितपदानि अधिकृत्य प्रश्ननिर्माणं कुरुत–

(क) विद्याविहीनः <u>नरः</u> पशुः अस्ति।

(ख) <u>विद्या</u> राजसु पूज्यते।

(ग) चन्द्रोज्ज्वलाः <u>हाराः</u> पुरुषं न अलङ्कुर्वन्ति।

(घ) <u>पिता</u> हिते नियुङ्क्ते।

(ङ) विद्याधनं <u>सर्वप्रधानं</u> धनमस्ति।

(च) विद्या <u>दिक्षु</u> कीर्तिं तनोति।

6. **पूर्णवाक्येन प्रश्नानाम् उत्तराणि लिखत-**

(क) गुरूणां गुरुः का अस्ति?

(ख) कीदृशी वाणी पुरुषं समलङ्करोति?

(ग) व्यये कृते किं वर्धते?

(घ) विद्या कुत्र कीर्तिं वितनोति?

(ङ) माता पिता इव विद्या किं किं करोति?

7. **मञ्जूषातः पुँल्लिङ्ग-स्त्रीलिङ्ग-नपुंसकलिङ्गपदानि चित्वा लिखत-**

विद्या	धनम्	संस्कृता	सततम्	कुसुमम्	मूर्धजाः	पशुः	गुरुः	कान्ता

यथा-	पुँल्लिङ्गम्	स्त्रीलिङ्गम्	नपुंसकलिङ्गम्
	हाराः	अलङ्कृता	भूषणम्
	....	....	....
	....	....	....
	....	....	....